International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(1): 322-325
© 2024 IJSR
www.anantaajournal.com
Received: 25-05-2024
Accepted: 04-07-2024

**ए. के. पृथ्वीकृष्णाचलम्**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

**Corresponding Author:**
**ए. के. पृथ्वीकृष्णाचलम्**
शोधच्छात्रा, संस्कृतविभागः
उस्मानिया-विश्वविद्यालयः,
हैदराबादनगम्, तेलंगाना, भारत

# पुराणसाहित्ये लौकिककलानां समालोचनम्

**ए. के. पृथ्वीकृष्णाचलम्**

## प्रस्तावना

पुराणेषु अन्यतमं पुराणम् अग्निपुराणम्। अत्र पुराणे प्रतिपर्वणः माहात्म्येन सह नदीनां धर्माधर्मविषयाणां च सूक्ष्मातिसूक्ष्मनिर्देशनं विद्यते। तेनैव सह पुराणेऽस्मिन् समाजे प्रसिद्धानां लौकिककलानामपि प्रायः वर्णनं दृश्यते।

## 1. "वास्तुविद्या" इति कलायाः समालोचनम्

भवननिर्माणकला एव वास्तुविद्या इति कथ्यते। अग्निपुराणे "प्रासादलक्षणकथनम्" इति नाम्ना सम्पूर्णः अध्यायः विद्यते, यस्मिन् अध्याये वास्तुसम्बन्धीविद्यायाः सूक्ष्मरूपेण निर्देशः क्रियते। तद्यथा –

**हयग्रीव उवाच –**

प्रासादं सम्प्रवक्ष्यामि सर्वसाधारणं श्रृणु।
चतुरस्त्रीकृतं क्षेत्रं भजेत्षोडशधाबुधः....... ॥[1]

अत्र भगवान् हयग्रीवः कथयति यत्, "अहम् प्रासादनिर्माणविधिं विज्ञापयामि, तां विधिं सर्वे श्रृण्वन्तु इति। एवमुक्त्वा सः प्रासादनिर्माणाय यः विधिः, यावत् क्षेत्रम् आवश्यकं तत्सर्वमपि सूचयति। इत्यनेन प्रमाणीभूतं यत्, पुराणेऽस्मिन् वास्तुविद्या इति कलायाः सङ्केताः स्पष्टरूपेण विद्यन्ते इति। अस्याः एव कलायाः विषये अग्निपुराणे अन्यत्रापि विद्यते, यत्र अग्निदेवेन वास्तुलक्षणम् नाम एकः अध्यायः वर्णितः। अस्मिन् अध्याये चतुर्विधवर्णानां कृते कीदृशः भूमिः उपयुक्ता भवति, चतुषष्टिपदैः युक्तस्य वास्तुमण्डलस्य, केषां-केषां देवानां कीदृशभूमौ पूजा करणीया?[2] इत्यादि विषयाः वर्णिताः।

## 2. "वैजयिकीविद्या" इति कलायाः समालोचनम्

अस्मिन् आदिमहापुराणे वैजयिकीविद्यायाः अपि सङ्केताः प्राप्यन्ते। अत्र "युद्धजयार्णवीयनानाचक्राणि" इति नाम्ना एकः सम्पूर्णः अध्यायः विद्यते। अध्यायेऽस्मिन्

सर्वप्रथममेकस्य मन्त्रस्य वर्णनं क्रियते, मन्त्रोऽयं कर्णमोटी महाविद्या इत्यपि कथ्यते। अस्य पठनेन क्रोधः आयाति नेत्रे च रक्तवर्णे भवतः। मन्त्रोऽयं सर्ववर्णानां रक्षिका इत्यपि कथ्यते। तद्यथा –

ओ३म् ह्रीं कर्णमोटनि बहुरूपे बहुदंष्ट्रे...... ॥[3]

मन्त्रेऽस्मिन् उच्यते यत् उक्तस्य मन्त्रस्य यदि पठनं क्रियते चेत् योद्धा क्रुद्धः भूत्वा मारणे पातने च सन्नद्धः भवति, येन जयस्य प्राप्तिः भवतीति।

इत्थमेव "सङ्ग्रामविजयविद्या" इति नाम्ना एकः अध्यायः अस्मिन् पुराणे विद्यते, यत्र सङ्ग्रामेषु कथं विजयः प्राप्तव्यः इति सूच्यते। तस्य अध्याय श्लोकाः अधः निर्दिष्टाः

ईश्वर उवाच –

सङ्ग्रामविजयां विद्यां पदमालां ..............ओ३म् विच्चे हुं फट् स्वाहा ॥[4]

इत्थं जयापजयस्य साधिका एषा वैजयिकीविद्या पुराणसाहित्येऽपि उपलभ्यते इति कथने न कोऽपि सङ्कोचः स्यात्।

मत्स्यपुराणे लौकिककलानां समालोचनम्

अष्टादशपुराणेषु मत्स्यपुराणस्य विशिष्टं स्थानं वर्त्तते। भगवतः विष्णोः मत्स्यावतारेण सम्बद्धमिमं पुराणम्। पुराणेऽस्मिन् भगवान् मत्स्येन वैवस्वतमनुं सप्तर्षीन् च ये दिव्योपदेशाः उपदिष्टाः तेषामुपदेशानां सङ्ग्रहोऽस्ति। भारतदेशे वैष्णव-शैव-शाक्त-गाणपत्यादिषु सर्वेषु सम्प्रदायेषु मत्स्यपुराणस्य समानरूपेण मान्यता वर्त्तते। अस्य पुराणस्य श्लोकसंख्या चतुर्दशसहस्रपरिमितम्। पुराणोऽयं 291 अध्यायेषु निबद्धमस्ति। अत्र भगवतः उपदेशेषु लौकिककलानामपि विषयः मध्ये-मध्ये दीयते, येषु विषयेषु तस्मिन् काले प्रचलने स्थितानां सामाजिकविषयवस्तुनः अपि सम्यग् दिग्दर्शनं क्रियते।

### 3. **"गीतवाद्यकलयोः" समालोचनम्**

मत्स्यपुराणे मदनद्वादशीव्रतसमये गीतवाद्यादीनां वर्णनं विद्यते, येन अनुमीयते यत् तस्मिन् समयेऽपि गीतादिकलानां लोके प्रचलनम् आसीत् । मदनद्वादशीव्रतस्य वर्णने कथ्यते-

गन्धं धूपं ततो दद्यात् गीतं वाद्यं च कारयेत्।

तदभावे कथां कुर्यात् कामकेशवयोर्नरः ॥[5]

अर्थात् तस्मिन् व्रते गीतवाद्ययोः महत्वमासीत् एते तस्य व्रतस्य अभिन्नाङ्गौ स्तः इति ज्ञायते। एतदतिरिक्तम् अस्मिन्नेवाध्याये महर्षिकश्यपः यदा स्वधर्मपत्नीं दितिं उपदिशति यत् कथं गर्भस्थशिशोः रक्षा करणीया इति, तस्मिन् प्रसङ्गे औषधीनानामपि वर्णनं विद्यते, येन "चित्रयोग" इति कलायाः सङ्केताः अत्र सन्तीति वक्तुं शक्यते।

### 4. **"वास्तुविद्या" इति कलायाः समालोचनम्**

मत्स्यपुराणे त्रिपुरनिर्माणस्य वर्णनं प्राप्यते। अस्मिन् वर्णने भगवान् ब्रह्मा मयदानवस्य तपसा प्रसन्नो भूत्वा तस्य सम्मुखं प्रत्यक्षीभूतवान्। सहसा ब्रह्मणं दृष्ट्वा मयदानवः तस्य स्तुतिमारब्धवान्, एतद् दृष्ट्वा प्रसन्नमनः भगवान् ब्रह्मा, मयदानवं वरयाचनायै उक्तवान्। अस्मिन् प्रसङ्गे एव मयदानवः ब्रह्मणं प्रार्थ्यते यत्, एवंविधदुर्गस्य निर्माणं कर्तुमिच्छामि यत्र मुनीनां श्रापस्य, देवानामस्त्रस्य अथवा देवानां प्रभावः न भवेत्। अत्र ध्यातव्यः विषयः यत्, मयदानवः वास्तुविद्याप्रवीणः इति। भगवान् ब्रह्मा एतस्मै वरं दत्त्वा अन्तर्भूतो जायते। तत्पश्चात् अनेन दानवेन कथं दुर्गनिर्माणं कृतमिति चेदुच्यते –

"पुराण्येकप्रहारेण स तानि निहनिष्यति।
आयसं तु क्षितितले राजतं तु ......... ॥[6]"

अनेन दुर्गनिर्माणविधिना स्पष्टरूपेण ज्ञायते, यत् एषा वास्तुविद्या एव। एतावदेव न अपितु अस्मिन् पुराणे 255, 256, इत्येतौ संख्यात्मकौ अध्यायौ अपि वास्तुविद्यायाः निदर्शनरूपौ । इत्येतयोः अध्याययोः "वास्तुविषयक वेधस्य विवरणम्, अन्यच्च गृहनिर्माणविधिश्च विस्तृतरूपेण वर्ण्यन्ते।

इत्थमनेन निरूपणेन ज्ञायते यत् अस्मिन् पुराणे लौकिककलासु वास्तुविद्या इति कलायाः वर्णनं विद्यते इति।

विष्णुधर्मोत्तरपुराणे लौकिककलानां समालोचनम्

विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डे लौकिककलानां प्रायः सङ्केताः परिलक्ष्यन्ते, अस्मिन् खण्डे लौकिककलानामनुरूपेणैव अध्यायानां नामानि अपि विद्यन्ते। अस्य खण्डस्य तृतीये अध्याये छन्दोविज्ञानम् इति कलायाः समावेशः दृश्यते। यत्र समेषां वैदिक-लौकिकछन्दसां नियमाः प्रदर्श्यन्ते, तद्यथा –

"नवाक्षरा तु बृहती पङ्क्तिसंज्ञ दशाक्षरम्।
एकादशाक्षर ....... ॥7"

इत्थमस्मिन् सम्पूर्णेऽध्याये सर्वेषां छन्दसां लक्षणानि प्रदीयन्ते, येन अनुमातुं शक्यते यत्, तस्मिन् काले काव्यरचनाः क्रियन्ते स्म, अन्यच्च तेषां काव्यरचनानां कृते लोके लक्षणानामेकरूपता नासीत्, अतः अध्यायरूपेण एवंविधा व्यवस्था अस्मिन् पुराणे कृता इति।

**5. "वाद्यम्" इति कलायाः समालोचनम्**

चतुष्षष्टिकलासु "वाद्यम्" इति द्वितीया कला। एषा कला गीत-नृत्यकलयोः पूरककला एव। अतएव अस्मिन् पुराणे उच्यते-

"आतोद्यं यो न जानाति तस्य नृत्तं हि दुर्विदम्।
आतोद्येविनानृत्तं विद्यते न कथञ्चन॥"8

इत्यनेन पुराणकारः स्पष्टीकरोति यत्, आतोद्येर्विनानृत्तम् अनावश्यकम् इति।

**6. "आलेख्यम्" इति कलायाः समालोचनम्**

धर्मार्थकाममोक्षप्रदायिनी एषा कला सर्वविधरूपेण मङ्गलवाहिका वर्त्तते। यथा पर्वतेषु सुमेरुः श्रेष्ठः अस्ति, विहङ्गेषु गरुडः, मनुष्येषु नरपतिः राजा, श्रेष्ठः अस्ति, तथैव कलासु चित्रकला श्रेष्ठा इति। पुराणेऽस्मिन् एषैव वार्ता कथ्यते –

"कलानां प्रवरं चित्रं धर्मकामार्थमोक्षदम्।
माङ्गल्यं प्रथमं चैतद्गृहे...... ॥"9

चित्रकलायाः उत्पत्तिविषये शास्त्रेषु द्वे कथे प्रसिद्धे स्तः। अनेन विष्णुधर्मोत्तरपुराणस्य चित्रसूत्रानुसारेण नारायणमुनिना लोकहितकामनायै देवाङ्गनानां सौन्दर्यविषयकालङ्कारसमाप्त्यर्थं सहकार-रसेन स्वोरोरुपरि एकस्याः सुन्दरस्त्रियः चित्रं निर्मितम्, येन उर्वशीनाम्नः अप्सरायाः जन्म अभवत्। सर्वैः लक्षणैः समन्वितं तत् प्रथमं चित्रमासीत्, यस्य शिक्षा एकस्याः कलायाः रूपे नारायणमुनिना विश्वकर्मणे प्रदत्तम्।10

स्कन्दपुराणे लौकिककलानां समालोचनम्

विभिन्नविषयाणां विस्तृतविवेचनदृष्ट्या स्कन्दपुराणं बृहत्तमं पुराणम्। भगवतः स्कन्दद्वारा पुराणमेतदुपदिष्टमिति कारणाद् अस्य पुराणस्य नाम स्कन्दपुराणम् इति। पुराणमेतत् खण्डात्मक-संहितात्मकरूपयोः उपलभ्यते। एतयोः द्वयोरपि खण्डयोः 81-81 श्लोकाः सन्ति। खण्डात्मकस्कन्दपुराणे क्रमशः माहेश्वर-वैष्णव-ब्राह्मादि सप्त खण्डाः सन्ति। संहितात्मकस्कन्दपुराणे सनत्कुमार-शंकर-ब्राह्म-सौरादि षड् संहिताः सन्ति। एतस्मिन् बदरिकाश्रमस्य, अयोध्यानगर्याः, जगन्नाथपुर्याः, रामेश्वरस्य, कन्याकुमार्यादीनां च मनोरमकथाः तथैव रामायणभागवतादिग्रन्थानां च माहात्म्यं रोचकशैल्यां प्रस्तुतीक्रियते। विभिन्नकथानां माध्यमेन भौगोलिकज्ञानस्य प्राचीनेतिहासस्य च ललितप्रस्तुतिरेव अस्य पुराणस्य वैशिष्ट्यम्।

**7. "रूप्यपरीक्षा" इति कलायाः समालोचनम्**

मणीनां रत्नानां च परीक्षा अथवा तेषामन्वेषणमेव "रूप्यपरीक्षा" इति कला। अस्यां कलायां निपुणाः जनाः मणीनामथवा रत्नानां परीक्षणे अन्वेषणे च कुशलाः भवन्ति। पुराणेऽस्मिन् विविधरत्नानां प्राकट्यं निरूप्यते। अत्र रत्नानां निरूपणे पुराणकारेण भौतिकरत्नानां स्थाने रत्नैः विभूषितस्य ऐरावत-गजेन्द्रस्य, उच्चैःश्रवा इति अश्वस्य , तथैव अन्येषामपि रत्नानां वर्णनं क्रियते। धारणयोग्यानि यानि रत्नानि भवन्ति, येषां मुख्यं प्रयोजनं सौन्दर्यवर्धनमिति, तेषां स्थाने ऐश्वर्यस्य वर्धकानां रत्नानां (ऐरावतादीनां) वर्णनमत्र क्रियते, एतानि रत्नानि राजा बलिः सुरासुरसंग्रामे इन्द्रं विजित्य स्वाधीने नयति।11

अत्र रूप्यपरीक्षा-कलायाः यथावद्रूपस्य ग्रहणं तु न क्रियते, किं तु तस्याः स्थाने रत्नमभिप्रेत्यवतामन्यानां विषयाणां ग्रहणं क्रियते।

**8. "चित्रयोग" इति कलायाः समालोचनम्**

विभिन्नप्रकाराणाम् औपनिषदिकयोगानां मन्त्र-तन्त्र-औषधीनां प्रयोगस्य ज्ञानमेव "चित्रयोग" इति कला। औषधिभ्यः पोषणं कथमिति निरूपणमस्मिन् पुराणे दीयते। पुराणेऽस्मिन् चन्द्रमसः उत्पत्तिः तेन च औषध्यादीनां पोषणं कथं भवतीति निरूप्यते, यत्र प्रथमं शिवपार्वत्योः संवादे माता पार्वती पृच्छति यत् चन्द्रमसः उत्पत्तिः कथं जाता? इत्यस्योत्तरे परमशिवेनोच्यते यत्, क्षीरसागरस्य मन्थनसमये 14 रत्नानामुत्पत्तिः जाता, येषु चन्द्रमा अपि एकं रत्नम्। अस्योत्पत्तिः अमृतेन अभवत्। अस्य चन्द्रमसः यः तेजः भूमौ सम्प्राप्ता, तेन तेजसा औषधीनामुत्पत्तिः सञ्जाता। ताभ्यः औषधिभ्यः एव प्रजायाः जीवनधारणं भवति। एतासु औषधिषु फलस्य प्राप्त्यनन्तरं याः औषधयः विनश्यन्ति, ताः शण इत्युच्यन्ते । ते च षोडशविधाः – धान्य-यव-गोधूमेत्यादयः।12

वर्णनेऽस्मिन् औषधिगुणानां प्रकथनेन अत्र पुराणे "चित्रयोग" इति

कलायाः सङ्केताः सन्तीति, प्रमाणीभूतम्।

गरुडपुराणे लौकिककलानां समालोचनम्

पुराणमेतद् मुख्यरूपेण पूर्वखण्ड-उत्तरखण्ड-ब्रह्मकाण्डेत्येतेषु त्रिषु खण्डेषु विभक्तमस्ति। अस्य पूर्वखण्डे सृष्ट्योत्पत्तिः, ध्रुवचरित्रम्, द्वादशादित्यानां कथाः, सूर्य-चन्द्रादिग्रहाणां मन्त्राः, उपासनाविधिः, भक्तिः, ज्ञानम्, वैराग्यम्, सदाचारस्य महिमा, यज्ञ-दान-तपेत्यादीनां विषयाणां वर्णनं प्राप्यते। अस्य उत्तरखण्डे धर्मकाण्ड-प्रेतकल्पस्य विवेचनं विशेषरूपेण विद्यते। एतदतिरिक्तम् और्ध्वदैहिकसंस्कारः, पिण्डदानम्, श्राद्धकर्म, सपिण्डीकरणम्, कर्मविपाकः, पापानां प्रायश्चित्तस्य विधानम् इत्येतेषामपि विषयाणां विस्तृतरूपेण वर्णनं विद्यते।

## 9. गरुडपुराणे "वास्तुविद्या" इति कलायाः समालोचनम्

वास्तुविद्या एका महत्वपूर्णा कला वर्त्तते। एषा स्थापत्यकला नाम्नाऽपि ज्ञायते। वास्तुकला एव वास्तुविद्या, अर्थात् भवननिर्माणकला इति । यथा पक्षिणः स्ववसतेः कृते नीडस्य निर्माणं कुर्वन्ति, तथैव मानवाः अपि स्ववसतेः कृते गृहाणाम् अथवा भवनानां निर्माणं कुर्वन्ति।

गरुडपुराणे वास्तुविद्यायाः वर्णनं एकस्मिन् सम्पूर्णे अध्याये विद्यते, यस्याध्यायस्य नाम "वास्तुमण्डल-पूजाविधिः" इति। अध्यायेऽस्मिन् हरिणा वास्तुपूजाविधेः वर्णने कथ्यते – "एषा पूजा (वास्तुपूजा) ईशान्यकोणात् प्रारभ्य एकाशीति-पदमण्डपानामन्तर्गते पूर्णा क्रियते। अस्य मण्डलस्य ईशानकोणे वास्तुदेवस्य मस्तकं भवति, नैऋत्यकोणे तस्य पादद्वयम्, अग्नि-वायुकोणयोः तस्य हस्तद्वयम् च भवतः। भवन-गृहादीनां, नगर-ग्राम-व्यापारिकपथ-प्रासाद-उद्यान-दुर्ग-देवालय-मठादीनां च निर्माणे वास्तुदेवस्य स्थापनापूर्वकं पूजा करणीया इति।"[13]

अत्र वास्तुदेवस्य, भवननिर्माणस्य च वर्णनेन परिज्ञायते यत् पुराणानां लेखनकाले अस्याः कलायाः प्राचुर्यमासीदिति। यत्र भवननिर्माणसमये वास्तुदेवस्य स्थापना विधिविधानेन जनैः क्रियते स्म।

## 10. गरुडपुराणे "निमित्तज्ञानम्" इति कलायाः समालोचनम्

प्रत्येकस्य कार्यस्य पूर्वभावो यद् कारणं विद्यते, तद् ज्ञातुं या जिज्ञासा अथवा प्रयत्नशीलता वर्त्तते, सैव "निमित्तज्ञानम्" इति कला। अत्र निमित्तज्ञाने मुख्यरूपेण शकुनापशकुनयोः विचारः क्रियते।

यत्र जनैः सर्वप्रथमं स्वशरीरस्य विषये एव विचारः क्रियते। ते स्वशरीरस्य अङ्गप्रत्यङ्गानां विषये चिन्तयन्ति यत्, तेषाम् अङ्गानि सौष्ठवानि सन्ति न वा, यदि सौष्ठवानि सन्ति, चेत् सुन्दराणि सन्ति न वा, यदि साधुरूपेण न सन्ति चेत्, पुनः समस्या उत्पन्ना भवति, एतादृशी अवस्थायाम् "अपशकुनविचारः" उत्पद्यते। अस्मिन् पुराणे कतिपय शुभाशुभयोगानां मुहूर्तानां च वर्णनं विद्यते। यत्र सूतमहर्षिः अन्यान् ऋषिगणान् उद्दिश्य श्रीहरिणा कथितस्य शुभाशुभयोगस्य वर्णनं करोति, तद्यथा –

"चतुर्थी, षष्ठी, अष्टमी, नवमी, द्वादशी, चतुर्दशी, अमावास्या, पूर्णिमा तिथयः च अशुभयोगाः, एतेषु दिवसेषु शुभकार्याणामारम्भः न कर्त्तव्यः, किं तु कृष्णपक्षस्य प्रतिपदा, बुधवासरेण युक्ता द्वितीया, शुभयोगकल्पिता भवति। अन्यच्च मङ्गलवासरेण युक्ता तृतीया, शनिवासरे चतुर्थी, गुरुवासरे पञ्चमी भवन्ति चेत् ताः अपि तिथयः शुभयुक्ताः भवन्ति।"[14]

एतेषां शुभयोगानां प्रस्तुतीकरणेन अवगम्यते यत् निमित्तज्ञानम् इत्यस्याः कलायाः सङ्केताः पुराणसाहित्येऽपि बहुत्र उपलभ्यन्ते, येनानुमीयते यत् तस्मिन् काले एतेषां शुभाशुभयोगानां ज्योतिषशास्त्रस्य च शिक्षणं प्रदीयते स्म।

## सन्दर्भ सूची


1. अ.पु. 42.01-04
2. तत्रैव
3. अ.पु. 125. 01-02
4. अ.पु. 135. 01-02
5. म.पु. 07.14
6. म.पु. 129.33-35
7. वि.ध.पु. 3.02-04
8. वि.ध.पु. 35.13
9. वि.ध.पु. 4.38-39
10. वि.ध.पु. 35.1-4
11. स्क.पु. माहेश्वरखण्ड-केदारखण्ड पृ. 16-17
12. स्क.पु. माहेश्वरखण्ड-केदारखण्ड पृ. 1229-1230
13. ग.पु. आचारखण्ड, पृ. 61-62
14. ग.पु. आचारखण्ड, पृ. 90